# Rudrasuktam from Rigveda

# ઋગ્વેદીય રુદ્રસૂક્તમ્

## Document Information

Text title : Rudrasuktam

File name : rudrasUktambasic.itx

Category : veda, sUkta, veda, svara, shiva

Location : doc_veda

Author : Vedic Tradition

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : Includes only anudAtta and svarita markers without any Rishi, Devata, Chanda

Latest update : March 17, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 19, 2025

*sanskritdocuments.org*

# ઋગ્વેદીય રુદ્રસૂક્તમ્

## સસ્વરઃ - અનુદાત્ત સ્વરિત

॥ ૐ શ્રીગુરુભ્યો નમઃ ॥

॥ હરિઃ ૐ ॥

કદ્રુદ્રાય પ્રચેતસે મીળ્હુષ્ટમાય તવ્યસે ।
વોચેમ શંતમં હૃદે ॥ ૧.૪૩.૧॥

યથા નો અદિતિઃ કરત્પશ્વે નૃભ્યો યથા ગવે ।
યથા તોકાય રુદ્રિયમ્ ॥ ૧.૪૩.૨॥

યથા નો મિત્રો વરુણો યથા રુદ્રશ્ચિકેતતિ ।
યથા વિશ્વે સજોષસઃ ॥ ૧.૪૩.૩॥

ગાથપતિં મેધપતિં રુદ્રં જલાષભેષજમ્ ।
તચ્છંયોઃ સુમ્નમીમહે ॥ ૧.૪૩.૪॥

યઃ શુક્ર ઇવ સૂર્યો હિરણ્યમિવ રોચતે ।
શ્રેષ્ઠો દેવાનાં વસુઃ ॥ ૧.૪૩.૫॥

શં નઃ કરત્યર્વતે સુગં મેષાય મેષ્યે ।
નૃભ્યો નારિભ્યો ગવે ॥ ૧.૪૩.૬॥

અસ્મે સોમ શ્રિયમધિ નિ ધેહિ શતસ્ય નૃણામ્ ।
મહિ શ્રવસ્તુવિનૃમ્ણમ્ ॥ ૧.૪૩.૭॥

મા નઃ સોમપરિબાધો મારાતયો જુહુરન્ત ।
આ ન ઇન્દો વાજે ભજ ॥ ૧.૪૩.૮॥

યાસ્તે પ્રજા અમૃતસ્ય પરસ્મિન્ધામન્નૃતસ્ય ।

મૂર્ધા નાભા સોમ વેન આભૂષન્તીઃ સોમ વેદઃ ॥ ૧.૪૩.૯॥

ઇમા રુદ્રાય તવસે કપર્દિને ક્ષયદ્વીરાય પ્ર ભરામહે મતીઃ ।
યથા શમસદ્દ્વિપદે ચતુષ્પદે વિશ્વં પુષ્ટં ગ્રામે અસ્મિન્નનાતુરમ્ ॥ ૧.૧૧૪.૧॥

મૃળા નો રુદ્રોત નો મયસ્કૃધિ ક્ષયદ્વીરાય નમસા વિધેમ તે ।
યચ્છં ચ યોશ્ચ મનુરાયેજે પિતા તદશ્યામ તવ રુદ્ર પ્રણીતિષુ ॥ ૧.૧૧૪.૨॥

અશ્યામ તે સુમતિં દેવયજ્યયા ક્ષયદ્વીરસ્ય તવ રુદ્ર મીઢ્વઃ ।
સુમ્નાયન્નિદ્વિશો અસ્માકમા ચરારિષ્ટવીરા જુહવામ તે હવિઃ ॥ ૧.૧૧૪.૩॥

ત્વેષં વયં રુદ્રં યજ્ઞસાધં વઙ્કું કવિમવસે નિ હ્વયામહે ।
આરે અસ્મદ્દૈવ્યં હેળો અસ્યતુ સુમતિમિદ્વયમસ્યા વૃણીમહે ॥ ૧.૧૧૪.૪॥

દિવો વરાહમરુષં કપર્દિનં ત્વેષં રૂપં નમસા નિ હ્વયામહે ।
હસ્તે બિભ્રદ્ભેષજા વાર્યાણિ શર્મ વર્મ ચ્છર્દિરસ્મભ્યં યંસત્ ॥ ૧.૧૧૪.૫॥

ઇદં પિત્રે મરુતામુચ્યતે વચઃ સ્વાદોઃ સ્વાદીયો રુદ્રાય વર્ધનમ્ ।
રાસ્વા ચ નો અમૃત મર્તભોજનં ત્મને તોકાય તનયાય મૃળ ॥ ૧.૧૧૪.૬॥

મા નો મહાન્તમુત મા નો અર્ભકં મા ન ઉક્ષન્તમુત મા ન ઉક્ષિતમ્ ।
મા નો વધીઃ પિતરં મોત માતરં મા નઃ પ્રિયાસ્તન્વો રુદ્ર રીરિષઃ ॥ ૧.૧૧૪.૭॥

મા નસ્તોકે તનયે મા ન આયૌ મા નો ગોષુ મા નો અશ્વેષુ રીરિષઃ ।
વીરાન્મા નો રુદ્ર ભામિતો વધીર્હવિષ્મન્તઃ સદમિત્ત્વા હવામહે ॥ ૧.૧૧૪.૮॥

ઉપ તે સ્તોમાન્પશુપા ઇવાકરં રાસ્વા પિતર્મરુતાં સુમ્નમસ્મે ।
ભદ્રા હિ તે સુમતિર્મૃળયત્તમાથા વયમવ ઇત્તે વૃણીમહે ॥ ૧.૧૧૪.૯॥

આરે તે ગોઘ્નમુત પૂરુષઘ્નં ક્ષયદ્વીર સુમ્નમસ્મે તે અસ્તુ ।
મૃળા ચ નો અધિ ચ બ્રૂહિ દેવાધા ચ નઃ શર્મ યચ્છ દ્વિબર્હાઃ ॥ ૧.૧૧૪.૧૦॥

અવોચામ નમો અસ્મા અવસ્યવઃ શૃણોતુ નો હવં રુદ્રો મરુત્વાન્ ।
તન્નો મિત્રો વરુણો મામહન્તામદિતિઃ સિન્ધુઃ પૃથિવી ઉત દ્યૌઃ ॥ ૧.૧૧૪.૧૧॥

આ તે પિતર્મરુતાં સુમ્નમેતુ મા નઃ સૂર્યસ્ય સંદૃશો યુયોથાઃ ।
અભિ નો વીરો અર્વતિ ક્ષમેત પ્ર જાયેમહિ રુદ્ર પ્રજાભિઃ ॥ ૨.૩૩.૧॥

ત્વાદત્તેભી રુદ્ર શંતમેભિઃ શતં હિમા અશીય ભેષજેભિઃ ।

વ્ય૧સ્મદ્દ્વેષો વિતરં વ્યંહો વ્યમીવાશ્ચાતયસ્વા વિષૂચીઃ ॥ ૨.૩૩.૨॥

શ્રેષ્ઠો જાતસ્ય રુદ્ર શ્રિયાસિ તવસ્તમસ્તવસાં વજ્રબાહો ।
પર્ષિ ણઃ પારમંહસઃ સ્વસ્તિ વિશ્વા અભીતી રપસો યુયોધિ ॥ ૨.૩૩.૩॥

મા ત્વા રુદ્ર ચુક્રુધામા નમોભિર્મા દુષ્ટુતી વૃષભ મા સહૂતી ।
ઉન્નો વીરાઁ અર્પય ભેષજેભિર્ભિષક્તમં ત્વા ભિષજાં શ◌ૃણોમિ ॥ ૨.૩૩.૪॥

હવીમભિર્હવતે યો હવિર્ભિરવ સ્તોમેભી રુદ્રં દિષીય ।
ઋદૂદરઃ સુહવો મા નો અસ્યૈ બભ્રુઃ સુશિપ્રો રીરધન્મનાયૈ ॥ ૨.૩૩.૫॥

ઉન્મા મમન્દ વૃષભો મરુત્વાન્ત્વક્ષીયસા વયસા નાધમાનમ્ ।
ઘૃણીવ ચ્છાયામરપા અશીયા વિવાસેયં રુદ્રસ્ય સુમ્નમ્ ॥ ૨.૩૩.૬॥

ક્વ૧ સ્ય તે રુદ્ર મૃળયાકુર્હસ્તો યો અસ્તિ ભેષજો જલાષઃ ।
અપભર્તા રપસો દૈવ્યસ્યાભી નુ મા વૃષભ ચક્ષમીથાઃ ॥ ૨.૩૩.૭॥

પ્ર બભ્રવે વૃષભાય શ્વિતીચે મહો મહીં સુષ્ટુતિમીરયામિ ।
નમસ્યા કલ્મલીકિનં નમોભિર્ગૃણીમસિ ત્વેષં રુદ્રસ્ય નામ ॥ ૨.૩૩.૮॥

સ્થિરેભિરઙ્ગૈઃ પુરુરૂપ ઉગ્રો બભ્રુઃ શુક્રેભિઃ પિપિશે હિરણ્યૈઃ ।
ઈશાનાદસ્ય ભુવનસ્ય ભૂરેર્ન વા ઉ યોષદ્રુદ્રાદસુર્યમ્ ॥ ૨.૩૩.૯॥

અર્હન્બિભર્ષિ સાયકાનિ ધન્વાર્હન્નિષ્કં યજતં વિશ્વરૂપમ્ ।
અર્હન્નિદં દયસે વિશ્વમભ્વં ન વા ઓજીયો રુદ્ર ત્વદસ્તિ ॥ ૨.૩૩.૧૦॥

સ્તુહિ શ્રુતં ગર્તસદં યુવાનં મૃગં ન ભીમમુપહત્નુમુગ્રમ્ ।
મૃળા જરિત્રે રુદ્ર સ્તવાનોઽન્યં તે અસ્મન્નિ વપન્તુ સેનાઃ ॥ ૨.૩૩.૧૧॥

કુમારશ્ચિત્પિતરં વન્દમાનં પ્રતિ નાનામ રુદ્રોપયન્તમ્ ।
ભૂરેર્દાતારં સત્પતિં ગૃણીષે સ્તુતસ્ત્વં ભેષજા રાસ્યસ્મે ॥ ૨.૩૩.૧૨॥

યા વો ભેષજા મરુતઃ શુચીનિ યા શંતમા વૃષણો યા મયોભુ ।
યાનિ મનુરવૃણીતા પિતા નસ્તા શં ચ યોશ્ચ રુદ્રસ્ય વશ્મિ ॥ ૨.૩૩.૧૩॥

પરિ ણો હેતી રુદ્રસ્ય વૃજ્યાઃ પરિ ત્વેષસ્ય દુર્મતિર્મહી ગાત્ ।
અવ સ્થિરા મઘવદ્ભ્યસ્તનુષ્વ મીઢ્વસ્તોકાય તનયાય મૃળ ॥ ૨.૩૩.૧૪॥

એવા બભ્રો વૃષભ ચેકિતાન યથા દેવ ન હૃણીષે ન હંસિ ।

હવનશ્રુન્નો રુદ્રેહ બોધિ બૃહદ્વદેમ વિદથે સુવીરાઃ ॥ ૨.૩૩.૧૫॥

સોમારુદ્રા ધારયેથામસુર્યં૧ પ્ર વામિષ્ટયોઽરમશ્નુવન્તુ ।
દમેદમે સપ્ત રત્ના દધાના શં નો ભૂતં દ્વિપદે શં ચતુષ્પદે ॥ ૬.૭૪.૧॥

સોમારુદ્રા વિ વૃહતં વિષૂચીમમીવા યા નો ગયમાવિવેશ ।
આરે બાધેથાં નિરૃતિં પરાચૈરસ્મે ભદ્રા સૌશ્રવસાનિ સન્તુ ॥ ૬.૭૪.૨॥

સોમારુદ્રા યુવમેતાન્યસ્મે વિશ્વા તનૂષુ ભેષજાનિ ધત્તમ્ ।
અવ સ્યતં મુઞ્ચતં યન્નો અસ્તિ તનૂષુ બદ્ધં કૃતમેનો અસ્મત્ ॥ ૬.૭૪.૩॥

તિગ્માયુધૌ તિગ્મહેતી સુશેવૌ સોમારુદ્રાવિહ સુ મૃળતં નઃ ।
પ્ર નો મુઞ્ચતં વરુણસ્ય પાશાદ્ગોપાયતં નઃ સુમનસ્યમાના ॥ ૬.૭૪.૪॥

ઇમા રુદ્રાય સ્થિરધન્વને ગિરઃ ક્ષિપ્રેષવે દેવાય સ્વધાવ્ને ।
અષાળ્હાય સહમાનાય વેધસે તિગ્માયુધાય ભરતા શ઼ૃણોતુ નઃ ॥ ૭.૪૬.૧॥

સ હિ ક્ષયેણ ક્ષમ્યસ્ય જન્મનઃ સામ્રાજ્યેન દિવ્યસ્ય ચેતતિ ।
અવન્નવન્તીરુપ નો દુરશ્ચરાનમીવો રુદ્ર જાસુ નો ભવ ॥ ૭.૪૬.૨॥

યા તે દિદ્યુદવસૃષ્ટા દિવસ્પરિ ક્ષ્મયા ચરતિ પરિ સા વૃણક્તુ નઃ ।
સહસ્રં તે સ્વપિવાત ભેષજા મા નસ્તોકેષુ તનયેષુ રીરિષઃ ॥ ૭.૪૬.૩॥

મા નો વધી રુદ્ર મા પરા દા મા તે ભૂમ પ્રસિતૌ હીળિતસ્ય ।
આ નો ભજ બર્હિષિ જીવશંસે યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૪૬.૪॥

તમીશાનં જગતસ્તસ્થુષસ્પતિં ધિયંજિન્વમવસે હૂમહે વયમ્ ।
પૂષા નો યથા વેદસામસદ્વૃધે રક્ષિતા પાયુરદબ્ધઃ સ્વસ્તયે ॥ ૧.૮૯.૫॥

અસ્મે રુદ્રા મેહના પર્વતાસો વૃત્રહત્યે ભરહૂતૌ સજોષા ।
યઃ શંસતે સ્તુવતે ધાયિ પજ્ર ઇન્દ્રજ્યેષ્ઠા અસ્માઁ અવન્તુ દેવાઃ ॥ ૮.૬૩.૧૨॥

ત્વમગ્ને રુદ્રો અસુરો મહો દિવસ્ત્વં શર્ધો મારુતં પૃક્ષ ઈશિષે ।
ત્વં વાતૈરરુણૈર્યાસિ શંગયસ્ત્વં પૂષા વિધતઃ પાસિ નુ ત્મના ॥ ૨.૧.૬॥

આ વો રાજાનમધ્વરસ્ય રુદ્રં હોતારં સત્યયજં રોદસ્યોઃ ।
અગ્નિં પુરા તનયિત્નોરચિત્તાદ્ધિરણ્યરૂપમવસે કૃણુધ્વમ્ ॥ ૪.૩.૧॥

ભુવનસ્ય પિતરં ગીર્ભિરાભી રુદ્રં દિવા વર્ધયા રુદ્રમક્તૌ ।

બૃહન્તમૃષ્વમજરં સુષુમ્નમૃધગ્ઘુવેમ કવિનેષિતાસઃ ॥ ૬.૪૯.૧૦॥

તમુ ષ્ટુહિ યઃ સ્વિષુઃ સુધન્વા યો વિશ્વસ્ય ક્ષયતિ ભેષજસ્ય ।

યક્ષ્વા મહે સૌમનસાય રુદ્રં નમોભિર્દેવમસુરં દુવસ્ય ॥ ૫.૪૨.૧૧॥

અયં મે હસ્તો ભગવાનયં મે ભગવત્તરઃ ।

અયં મે વિશ્વભેષજોઽયં શિવાભિમર્શનઃ ॥ ૧૦.૬૦.૧૨॥

ત્ર્યમ્બકં યજામહે સુગન્ધિં પુષ્ટિવર્ધનમ્ ।

ઉર્વારુકમિવ બન્ધનાન્મૃત્યોર્મુક્ષીય મામૃતાત્ ॥ ૭.૫૯.૧૨॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

॥ હરિઃ ૐ ॥

## નિઃસ્વરઃ

॥ ૐ શ્રીગુરુભ્યો નમઃ ॥

॥ હરિઃ ૐ ॥

કદ્રુદ્રાય પ્રચેતસે મીળ્હુષ્ટમાય તવ્યસે ।
વોચેમ શંતમં હૃદે ॥ ૧.૪૩.૧॥

યથા નો અદિતિઃ કરત્પશ્વે નૃભ્યો યથા ગવે ।
યથા તોકાય રુદ્રિયમ્ ॥ ૧.૪૩.૨॥

યથા નો મિત્રો વરુણો યથા રુદ્રશ્ચિકેતતિ ।
યથા વિશ્વે સજોષસઃ ॥ ૧.૪૩.૩॥

ગાથપતિં મેધપતિં રુદ્રં જલાષભેષજમ્ ।
તચ્છંયોઃ સુમ્નમીમહે ॥ ૧.૪૩.૪॥

યઃ શુક્ર ઇવ સૂર્યો હિરણ્યમિવ રોચતે ।
શ્રેષ્ઠો દેવાનાં વસુઃ ॥ ૧.૪૩.૫॥

શં નઃ કરત્યર્વતે સુગં મેષાય મેષ્યે ।
નૃભ્યો નારિભ્યો ગવે ॥ ૧.૪૩.૬॥

અસ્મે સોમ શ્રિયમધિ નિ ધેહિ શતસ્ય નૃણામ્ ।

મહિ શ્રવસ્તુવિનૃમ્ણમ્ ॥ ૧.૪૩.૭॥

મા નઃ સોમપરિબાધો મારાતયો જુહુરન્ત ।
આ ન ઇન્દો વાજે ભજ ॥ ૧.૪૩.૮॥

યાસ્તે પ્રજા અમૃતસ્ય પરસ્મિન્ધામન્નૃતસ્ય ।
મૂર્ધા નાભા સોમ વેન આભૂષન્તીઃ સોમ વેદઃ ॥ ૧.૪૩.૯॥

ઇમા રુદ્રાય તવસે કપર્દિને ક્ષયદ્વીરાય પ્ર ભરામહે મતીઃ ।
યથા શમસદ્દ્વિપદે ચતુષ્પદે વિશ્વં પુષ્ટં ગ્રામે અસ્મિન્નનાતુરમ્ ॥ ૧.૧૧૪.૧॥

મૃળા નો રુદ્રોત નો મયસ્કૃધિ ક્ષયદ્વીરાય નમસા વિધેમ તે ।
યચ્છં ચ યોશ્ચ મનુરાયેજે પિતા તદશ્યામ તવ રુદ્ર પ્રણીતિષુ ॥ ૧.૧૧૪.૨॥

અશ્યામ તે સુમતિં દેવયજ્યયા ક્ષયદ્વીરસ્ય તવ રુદ્ર મીઢ્વઃ ।
સુમ્નાયન્નિદ્વિશો અસ્માકમા ચરારિષ્ટવીરા જુહવામ તે હવિઃ ॥ ૧.૧૧૪.૩॥

ત્વેષં વયં રુદ્રં યજ્ઞસાધં વઙ્કું કવિમવસે નિ હ્વયામહે ।
આરે અસ્મદ્દૈવ્યં હેળો અસ્યતુ સુમતિમિદ્વયમસ્યા વૃણીમહે ॥ ૧.૧૧૪.૪॥

દિવો વરાહમરુષં કપર્દિનં ત્વેષં રૂપં નમસા નિ હ્વયામહે ।
હસ્તે બિભ્રદ્ભેષજા વાર્યાણિ શર્મ વર્મ ચ્છર્દિરસ્મભ્યં યંસત્ ॥ ૧.૧૧૪.૫॥

ઇદં પિત્રે મરુતામુચ્યતે વચઃ સ્વાદોઃ સ્વાદીયો રુદ્રાય વર્ધનમ્ ।
રાસ્વા ચ નો અમૃત મર્તભોજનં ત્મને તોકાય તનયાય મૃળ ॥ ૧.૧૧૪.૬॥

મા નો મહાન્તમુત મા નો અર્ભકં મા ન ઉક્ષન્તમુત મા ન ઉક્ષિતમ્ ।
મા નો વધીઃ પિતરં મોત માતરં મા નઃ પ્રિયાસ્તન્વો રુદ્ર રીરિષઃ ॥ ૧.૧૧૪.૭॥

મા નસ્તોકે તનયે મા ન આયૌ મા નો ગોષુ મા નો અશ્વેષુ રીરિષઃ ।
વીરાન્મા નો રુદ્ર ભામિતો વધીર્હવિષ્મન્તઃ સદમિત્ત્વા હવામહે ॥ ૧.૧૧૪.૮॥

ઉપ તે સ્તોમાન્પશુપા ઇવાકરં રાસ્વા પિતર્મરુતાં સુમ્નમસ્મે ।
ભદ્રા હિ તે સુમતિર્મૃળયત્તમાથા વયમવ ઇત્તે વૃણીમહે ॥ ૧.૧૧૪.૯॥

આરે તે ગોઘ્નમુત પૂરુષઘ્નં ક્ષયદ્વીર સુમ્નમસ્મે તે અસ્તુ ।
મૃળા ચ નો અધિ ચ બ્રૂહિ દેવાધા ચ નઃ શર્મ યચ્છ દ્વિબર્હાઃ ॥ ૧.૧૧૪.૧૦॥

અવોચામ નમો અસ્મા અવસ્યવઃ શ઼ૃણોતુ નો હવં રુદ્રો મરુત્વાન્ ।
તન્નો મિત્રો વરુણો મામહન્તામદિતિઃ સિન્ધુઃ પૃથિવી ઉત દ્યૌઃ ॥ ૧.૧૧૪.૧૧॥

આ તે પિતર્મરુતાં સુમ્નમેતુ મા નઃ સૂર્યસ્ય સંદૃશો યુયોથાઃ ।
અભિ નો વીરો અર્વતિ ક્ષમેત પ્ર જાયેમહિ રુદ્ર પ્રજાભિઃ ॥ ૨.૩૩.૧॥

ત્વાદત્તેભી રુદ્ર શંતમેભિઃ શતં હિમા અશીય ભેષજેભિઃ ।
વ્ય૧સ્મદ્દ્વેષો વિતરં વ્યંહો વ્યમીવાશ્ચાતયસ્વા વિષૂચીઃ ॥ ૨.૩૩.૨॥

શ્રેષ્ઠો જાતસ્ય રુદ્ર શ્રિયાસિ તવસ્તમસ્તવસાં વજ્રબાહો ।
પર્ષિ ણઃ પારમંહસઃ સ્વસ્તિ વિશ્વા અભીતી રપસો યુયોધિ ॥ ૨.૩૩.૩॥

મા ત્વા રુદ્ર ચુક્રુધામા નમોભિર્મા દુષ્ટુતી વૃષભ મા સહૂતી ।
ઉન્નો વીરાઁ અર્પય ભેષજેભિર્ભિષક્તમં ત્વા ભિષજાં શ◌ૃણોમિ ॥ ૨.૩૩.૪॥

હવીમભિર્હવતે યો હવિર્ભિરવ સ્તોમેભી રુદ્રં દિષીય ।
ઋદૂદરઃ સુહવો મા નો અસ્યૈ બભ્રુઃ સુશિપ્રો રીરધન્મનાયૈ ॥ ૨.૩૩.૫॥

ઉન્મા મમન્દ વૃષભો મરુત્વાન્ત્વક્ષીયસા વયસા નાધમાનમ્ ।
ઘૃણીવ ચ્છાયામરપા અશીયા વિવાસેયં રુદ્રસ્ય સુમ્નમ્ ॥ ૨.૩૩.૬॥

ક્વ૧ સ્ય તે રુદ્ર મૃળયાકુર્હસ્તો યો અસ્તિ ભેષજો જલાષઃ ।
અપભર્તા રપસો દૈવ્યસ્યાભી નુ મા વૃષભ ચક્ષમીથાઃ ॥ ૨.૩૩.૭॥

પ્ર બભ્રવે વૃષભાય શ્વિતીચે મહો મહીં સુષ્ટુતિમીરયામિ ।
નમસ્યા કલ્મલીકિનં નમોભિર્ગૃણીમસિ ત્વેષં રુદ્રસ્ય નામ ॥ ૨.૩૩.૮॥

સ્થિરેભિરઙ્ગૈઃ પુરુરૂપ ઉગ્રો બભ્રુઃ શુક્રેભિઃ પિપિશે હિરણ્યૈઃ ।
ઈશાનાદસ્ય ભુવનસ્ય ભૂરેર્ન વા ઉ યોષદ્રુદ્રાદસુર્યમ્ ॥ ૨.૩૩.૯॥

અર્હન્બિભર્ષિ સાયકાનિ ધન્વાર્હન્નિષ્કં યજતં વિશ્વરૂપમ્ ।
અર્હન્નિદં દયસે વિશ્વમભ્વં ન વા ઓજીયો રુદ્ર ત્વદસ્તિ ॥ ૨.૩૩.૧૦॥

સ્તુહિ શ્રુતં ગર્તસદં યુવાનં મૃગં ન ભીમમુપહત્નુમુગ્રમ્ ।
મૃળા જરિત્રે રુદ્ર સ્તવાનોઽન્યં તે અસ્મન્નિ વપન્તુ સેનાઃ ॥ ૨.૩૩.૧૧॥

કુમારશ્ચિત્પિતરં વન્દમાનં પ્રતિ નાનામ રુદ્રોપયન્તમ્ ।
ભૂરેર્દાતારં સત્પતિં ગૃણીષે સ્તુતસ્ત્વં ભેષજા રાસ્યસ્મે ॥ ૨.૩૩.૧૨॥

યા વો ભેષજા મરુતઃ શુચીનિ યા શંતમા વૃષણો યા મયોભુ ।
યાનિ મનુરવૃણીતા પિતા નસ્તા શં ચ યોશ્ચ રુદ્રસ્ય વશ્મિ ॥ ૨.૩૩.૧૩॥

પરિ ણો હેતી રુદ્રસ્ય વૃજ્યાઃ પરિ ત્વેષસ્ય દુર્મતિર્મહી ગાત્ ।
અવ સ્થિરા મઘવદ્ભ્યસ્તનુષ્વ મીઢ્વસ્તોકાય તનયાય મૃળ ॥ ૨.૩૩.૧૪॥

એવા બભ્રો વૃષભ ચેકિતાન યથા દેવ ન હૃણીષે ન હંસિ ।
હવનશ્રુન્નો રુદ્રેહ બોધિ બૃહદ્વદેમ વિદથે સુવીરાઃ ॥ ૨.૩૩.૧૫॥

સોમારુદ્રા ધારયેથામસુર્યં૧ પ્ર વામિષ્ટયોઽરમશ્નુવન્તુ ।
દમેદમે સપ્ત રત્ના દધાના શં નો ભૂતં દ્વિપદે શં ચતુષ્પદે ॥ ૬.૭૪.૧॥

સોમારુદ્રા વિ વૃહતં વિષૂચીમમીવા યા નો ગયમાવિવેશ ।
આરે બાધેથાં નિરૃતિં પરાચૈરસ્મે ભદ્રા સૌશ્રવસાનિ સન્તુ ॥ ૬.૭૪.૨॥

સોમારુદ્રા યુવમેતાન્યસ્મે વિશ્વા તનૂષુ ભેષજાનિ ધત્તમ્ ।
અવ સ્યતં મુઞ્ચતં યન્નો અસ્તિ તનૂષુ બદ્ધં કૃતમેનો અસ્મત્ ॥ ૬.૭૪.૩॥

તિગ્માયુધૌ તિગ્મહેતી સુશેવૌ સોમારુદ્રાવિહ સુ મૃળતં નઃ ।
પ્ર નો મુઞ્ચતં વરુણસ્ય પાશાદ્ગોપાયતં નઃ સુમનસ્યમાના ॥ ૬.૭૪.૪॥

ઇમા રુદ્રાય સ્થિરધન્વને ગિરઃ ક્ષિપ્રેષવે દેવાય સ્વધાવ્ને ।
અષાળ્હાય સહમાનાય વેધસે તિગ્માયુધાય ભરતા શ◌ૃણોતુ નઃ ॥ ૭.૪૬.૧॥

સ હિ ક્ષયેણ ક્ષમ્યસ્ય જન્મનઃ સામ્રાજ્યેન દિવ્યસ્ય ચેતતિ ।
અવન્નવન્તીરુપ નો દુરશ્ચરાનમીવો રુદ્ર જાસુ નો ભવ ॥ ૭.૪૬.૨॥

યા તે દિદ્યુદવસૃષ્ટા દિવસ્પરિ ક્ષ્મયા ચરતિ પરિ સા વૃણક્તુ નઃ ।
સહસ્રં તે સ્વપિવાત ભેષજા મા નસ્તોકેષુ તનયેષુ રીરિષઃ ॥ ૭.૪૬.૩॥

મા નો વધી રુદ્ર મા પરા દા મા તે ભૂમ પ્રસિતૌ હીળિતસ્ય ।
આ નો ભજ બર્હિષિ જીવશંસે યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ ૭.૪૬.૪॥

તમીશાનં જગતસ્તસ્થુષસ્પતિં ધિયંજિન્વમવસે હૂમહે વયમ્ ।
પૂષા નો યથા વેદસામસદ્વૃધે રક્ષિતા પાયુરદબ્ધઃ સ્વસ્તયે ॥ ૧.૮૯.૫॥

અસ્મે રુદ્રા મેહના પર્વતાસો વૃત્રહત્યે ભરહૂતૌ સજોષા ।
યઃ શંસતે સ્તુવતે ધાયિ પજ્ર ઇન્દ્રજ્યેષ્ઠા અસ્માઁ અવન્તુ દેવાઃ ॥ ૮.૬૩.૧૨॥

ત્વમગ્ને રુદ્રો અસુરો મહો દિવસ્ત્વં શર્ધો મારુતં પૃક્ષ ઈશિષે ।
ત્વં વાતૈરરુણૈર્યાસિ શંગયસ્ત્વં પૂષા વિધતઃ પાસિ નુ ત્મના ॥ ૨.૧.૬॥

આ વો રાજાનમધ્વરસ્ય રુદ્રં હોતારં સત્યયજં રોદસ્યોઃ ।
અગ્નિં પુરા તનયિત્નોરચિત્તાદ્ધિરણ્યરૂપમવસે કૃણુધ્વમ્ ॥ ૪.૩.૧॥

ભુવનસ્ય પિતરં ગીર્ભિરાભી રુદ્રં દિવા વર્ધયા રુદ્રમક્તૌ ।

બૃહન્તમૃષ્વમજરં સુષુમ્નમૃધગ્ઘુવેમ કવિનેષિતાસઃ ॥ ૬.૪૯.૧૦॥

તમુ ષ્ટુહિ યઃ સ્વિષુઃ સુધન્વા યો વિશ્વસ્ય ક્ષયતિ ભેષજસ્ય ।
યક્ષ્વા મહે સૌમનસાય રુદ્રં નમોભિર્દેવમસુરં દુવસ્ય ॥ ૫.૪૨.૧૧॥

અયં મે હસ્તો ભગવાનયં મે ભગવત્તરઃ ।
અયં મે વિશ્વભેષજોઽયં શિવાભિમર્શનઃ ॥ ૧૦.૬૦.૧૨॥

ત્ર્યમ્બકં યજામહે સુગન્ધિં પુષ્ટિવર્ધનમ્ ।
ઉર્વારુકમિવ બન્ધનાન્મૃત્યોર્મુક્ષીય મામૃતાત્ ॥ ૭.૫૯.૧૨॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

॥ હરિઃ ૐ ॥

Notes:

RudraSūktam રુદ્રસૂક્તમ્ is a compilation from The ṚgVeda Samhitā ઋગ્વેદ સંહિતા of Ṛcā-s ઋચા dedicated to Rudra રુદ્ર.

Vedic Accents/Svara were referenced mainly from the source texts given in the links below.

The intonation of Sound of the Vedic Accents/Svara and recitation of Vedic Texts needs to be learned from experts of the related traditions to which they are specific.

The markings/symbols of Vedic Accents/Svara may be found to vary amongst publications and individual compilations based on Veda, tradition/branch, publication etc. and need to be learned from subject experts.

The compilations of Ṛcā-s ઋચા in RudraSūktam રુદ્રસૂક્તમ્ and PañcaRudram પઞ્ચરુદ્રમ્ are almost similar for the most part. Each comprises of the Sūktāni સૂક્તાનિ 1.43 ૧।૪૩ , 1.114 ૧।૧૧૪ , 2.33 ૨।૩૩ , 6.74 ૬।૭૪ and 7.46 ૭।૦૪૬ in a sequence, followed by some assorted Ṛcā-s ઋચા that have minor differences between the two with respect to content and order.

Encoded and proofread by Ruma Dewan

*Rudrasuktam from Rigveda*

pdf was typeset on March 19, 2025

Please send corrections to *sanskrit@cheerful.com*